१३

हनुमत्कृता रामलक्ष्मणप्रशंसा

प्रस्तावना

त्रेतायुगस्य चन्द्रः आसीत् श्रीरामः। पुरुषोत्तमः श्रीरामः इति प्रसिद्धिः वर्तते। अनेनैव वयं श्रीरामस्य वीरत्वसौन्दर्यविषये च किञ्चित् चिन्तयितुं शक्नुमः। वयं तु इदानीं सर्वत्र रामगुणकीर्तनं कुर्मः, तेन च अस्माकं महान् आनन्दः अपि भवति। वयं साधारणाः यदि तद्गुणकीर्तनं सानन्दं कुर्मः, तर्हि महान् भक्तः हनुमान् निःस्वार्थभक्त्या स्वप्रभोः रामस्य कीदृशं गुणकीर्तनं कृतवान् इति चिन्तनेनैव अस्माकम् आनन्दः जायते। अवश्यम् एव एतत् अस्माभिः सर्वैः भारतीयैः एव ज्ञातव्यम्। अस्मिन् पाठे वयं तम् एव विषयं ज्ञास्यामः। तेन रामः कीदृशः वीरः आसीत् , तस्य कीदृशं सौन्दर्यं च आसीत् इति ज्ञात्वा आनन्दम् अनुभवामः। अस्मिन् पाठे त्रयोदश श्लोकाः वर्तन्ते।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- रामस्य सौन्दर्यविषये ज्ञातुं शक्नुयात्।
- रामः महान् वीरः आसीत् इति ज्ञास्यति।
- रामस्य सर्वाणि अस्त्राणि कीदृशानि आसन् इत्यस्मिन् विषये ज्ञानं प्राप्नुयात्।
- श्लोके स्थितानां पदानाम् अन्वयः केन प्रकारेण कर्तव्यः इति जानीयात्।
- व्याकरणविषयकं किञ्चित् ज्ञानं प्राप्नुयात्।
- श्लोकानां व्याख्या केन प्रकारेण कर्तव्या इत्यस्मिन् विषये ज्ञास्यति।
- उपमालङ्कारस्य विषये किञ्चित् ज्ञानं प्राप्स्यति।

१३.१) मूलपाठः

प्रभया पर्वतेन्द्रोऽसौ युवयोरवभासितः ।
राज्यार्हावमरप्रख्यौ कथं देशमिहागतौ ॥११॥

पद्मपत्रेक्षणौ वीरौ जटामण्डलधारिणौ ।
अन्योन्यसदृशौ वीरौ देवलोकादिहागतौ ॥१२॥

यदृच्छयेव संप्राप्तौ चन्द्रसूर्यौ वसुंधराम् ।
विशालवक्षसौ वीरौ मानुषौ देवरूपिणौ ॥१३॥

सिंहस्कन्धौ महोत्साहौ समदौ इव गोवृषौ ।
आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः ॥१४॥

सर्वभूषणभूषार्हाः किमर्थम् न विभूषिताः ।
उभौ योग्यावहं मन्ये रक्षितुम् पृथिवीम् इमाम् ॥१५॥

ससागरवनां कृत्स्नां विन्ध्यमेरुविभूषिताम् ।
इमे च धनुषी चित्रे श्लक्ष्णे चित्रानुलेपने ॥१६॥

प्रकाशेते यथेन्द्रस्य वज्रे हेमविभूषिते ।
संपूर्णाश्च शितैर्बाणैस्तूणाश्च शुभदर्शनाः ॥१७॥

जीवितान्तकरैर्घोरैर्ज्वलद्भिरिव पन्नगैः ।
महाप्रमाणौ विपुलौ तप्तहाटकभूषणौ ॥१८॥

खड्गावेतौ विराजेते निर्मुक्तभुजगाविव ।
एवं मां परिभाषन्तं कस्माद् वै नाभिभाषतः ॥१९॥

सुग्रीवो नाम धर्मात्मा कश्चिद् वानरपुंगवः ।
वीरो विनिकृतो भ्रात्रा जगद् भ्रमति दुःखितः ॥२०॥

प्राप्तोऽहं प्रेषितस्तेन सुग्रीवेण महात्मना ।
राज्ञा वानरमुख्यानां हनुमान् नाम वानरः ॥२१॥

युवाभ्याम् स हि धर्मात्मा सुग्रीवः सख्यमिच्छति ।
तस्य मां सचिवं वित्तं वानरं पवनात्मजम् ॥२२॥

भिक्षुरूपप्रतिच्छन्नंसुग्रीवप्रियकारणात् ।
ऋष्यमूकादिह प्राप्तं कामगं कामचारिणम् ॥२३॥

१३.२) इदानीं मूलपाठम् अवगच्छाम

प्रभया पर्वतेन्द्रोऽसौ युवयोरवभासितः।
राज्यार्हावमरप्रख्यौ कथं देशमिहागतौ।।११।।

अन्वयः - युवयोः प्रभया असौ पर्वतेन्द्रः अवभासितः, (तादृशौ) राज्यार्हौ अमरप्रख्यौ (युवां) इह देशं कथम् आगतौ।

अन्वयार्थः - युवयोः रामलक्ष्मणयोः प्रभया दीप्त्या असौ अयं पर्वतेन्द्रः गिरिराजः अवभासितः प्रकाशितः, (तादृशौ) राज्यार्हौ राज्ययोग्यौ अमरप्रख्यौ देवसदृशपराक्रमौ (युवां) इह अत्र देशं प्रदेशं कथम् केन हेतुना आगतौ समागतौ।

सरलार्थः - हनुमान् रामलक्ष्मणौ प्रति पृष्टवान् यत् - ययोः दीप्त्या अयम् ऋष्यमूकनामकः पर्वतराजः प्रकाशितो जातः, तादृशौ दीप्तिमन्तौ राजसिंहासनयोग्यौ देवसदृशपराक्रमविशिष्टौ युवां केन कारणेन इमं देशम् आगतवन्तौ इति।

तात्पर्यार्थः - रामलक्ष्मणौ वनवासं कृतवन्तौ, अतः वने यत् भोज्यं प्राप्यते स्म तदेव खादितवन्तौ तौ। तथापि तयोः एवं कान्तिः आसीत् यत्, तया कान्त्या सम्पूर्णः ऋष्यमूकपर्वतः प्रकाशितः अभवत्। तयोः दर्शनेन ज्ञायते स्म यत् तौ राजसिंहासनस्य कृते योग्यौ। किञ्च देवानां यथा पराक्रमः भवति, तथा पराक्रमः आसीत् रामलक्ष्मणयोः। परन्तु तथापि एतौ तपस्विनौ भूत्वा वने भ्रमन्ति स्म। अत एव विस्मितः हनुमान् तौ प्रति पृष्टवान् यत् - एवं कान्तियुक्तौ राजसिंहासनस्य कृते योग्यौ पराक्रमविशिष्टौ युवां राजसिंहासनं त्यक्त्वा केन कारणेन इमं दुर्गमं देशम् आगतवन्तौ इति। अर्थात् राज्यभोगः एव युवयोः उचितः, वनवासः नोचितः इति हनुमतः आशयः।

व्याकरणविमर्शः -

- अवभासितः - अवपूर्वकात् भास्-धातोः क्तप्रत्यये प्रथमैकवचने अवभासितः इति रूपम्।
- राज्यार्हौ - राज्याय अर्हः राज्यार्हः, तौ राज्यार्हौ इति चतुर्थीतत्पुरुषसमासः।

सन्धिकार्यम् -

- पर्वतेन्द्रोऽसौ = पर्वतेन्द्रः + असौ। (विसर्गसन्धिः)
- इहागतौ = इह + आगतौ। (सवर्णदीर्घसन्धिः)
- राज्यार्हावमरप्रख्यौ = राज्यार्हौ + अमरप्रख्यौ (अच्-सन्धिः)

प्रयोगपरिवर्तनम् - युवयोः प्रभा अमुं पर्वतेन्द्रम् अवभासितवती, (तादृशाभ्यां) राज्यार्हाभ्याम् अमरप्रख्याभ्यां (युवाभ्यां) इह देशः कथम् आगतः।

पद्मपत्रेक्षणौ वीरौ जटामण्डलधारिणौ।
अन्योन्यसदृशौ वीरौ देवलोकादिहागतौ।।१२।।

अन्वयः - पद्मपत्रेक्षणौ जटामण्डलधारिणौ अन्योन्यसदृशौ वीरौ देवलोकात् इह (देशं कथं) आगतौ।

अन्वयार्थः - पद्मपत्रेक्षणौ कमलपत्रसदृशनेत्रविशिष्टौ जटामण्डलधारिणौ जटाधारिणौ अन्योन्यसदृशौ परस्परतुल्यौ वीरौ शूरौ देवलोकात् स्वर्गलोकात् इह (देशं कथं) अत्र आगतौ समागतौ।

सरलार्थः - भिक्षुकवेषधारी हनुमान् रामलक्ष्मणौ पृष्टवान् यत् - कमलपत्रसदृशनेत्रविशिष्टौ जटाधारिणौ तपस्विनौ परस्परतुल्यौ महावीरौ युवां देवलोकात् इमं दुर्गमं देशं केन कारणेन प्रस्थितौ इति।

तात्पर्यार्थः - पद्मस्य पत्रं यथा दर्शनेन बहुरमणीयं भवति, तथा सुन्दरम् आसीत् रामलक्ष्मणयोः नेत्रद्वयम्। एवं सौन्दर्ययुक्तौ रामलक्ष्मणौ जटाधारिणौ आस्ताम्। किञ्च एतौ परस्परतुल्यौ आस्ताम्, अर्थात् लक्ष्मणः रामवत् वीरः सुन्दरश्च आसीत्, रामश्च लक्ष्मणवत् वीरः सुन्दरश्च आसीत्। तयोः दर्शनेन ज्ञायते स्म यत्, तौ स्वर्गलोकात् एव अत्र आगतवन्तौ। अत एव वानरोत्तमः हनुमान् तौ पृष्टवान् यत् - एवंविध-सौन्दर्ययुक्तौ जटाधारिणौ तापसौ युवां स्वर्गलोकं त्वक्त्वा कस्मात् कारणात् इमं दुर्गमं देशम् आगतवन्तौ इति।

व्याकरणविमर्शः -

- पद्मपत्रेक्षणौ - पद्मस्य पत्रं पद्मपत्रम् इति षष्ठीतत्पुरुषसमासः। पद्मपत्रम् इव ईक्षणे ययोस्तौ पद्मपत्रेक्षणौ इति उपमानपदपूर्वकबहुव्रीहिसमासः।
- जटामण्डलधारिणौ - जटायाः मण्डलं जटामण्डलम् इति षष्ठीतत्पुरुषसमासः। जटामण्डलं धरति इत्यर्थे धृधातोः इन्-प्रत्यये प्रथमाद्विवचने जटामण्डलधारिणौ इति रूपम्।
- अन्योन्यसदृशौ - अन्योन्येन सदृशौ अन्योन्यसदृशौ इति तृतीयातत्पुरुषसमासः।

प्रयोगपरिवर्तनम् - पद्मपत्रेक्षणाभ्यां जटामण्डलधारिभ्याम् अन्योन्यसदृशाभ्यां वीराभ्यां देवलोकात् इह (देशः कथं) आगतः।

अलङ्कारालोचना - श्लोकेऽस्मिन् उपमालङ्कारः वर्तते। उपमालङ्कारस्य चत्वारः अंशाः भवन्ति, ते च उपमेयम्, उपमानं, सादृश्यवाचकपदम्, सादृश्यधर्मः चेति। उपमा द्विविधा भवति पूर्णोपमा, लुप्तोपमा चेति। यत्र एते चत्वारः अंशाः एव तिष्ठन्ति सा पूर्णोपमा भवति। यत्र च एतेषां चतुर्णां मध्ये कश्चित् एकः ततोऽधिकः वा अंशः न तिष्ठति सा लुप्तोपमा भवति। अत्र उपमेयं हि ईक्षणे अर्थात् नेत्रे इति। उपमानं हि पद्मपत्रे इति। सादृश्यवाचकपदम् अत्र नास्ति। सादृश्यधर्मः हि सुन्दरत्वम् इति। अस्मिन् श्लोके सादृश्यवाचकपदस्य सादृश्यधर्मस्य च असत्त्वात् अत्र लुप्तोपमा वर्तते।

यदृच्छयेव संप्राप्तौ चन्द्रसूर्यौ वसुंधराम्।
विशालवक्षसौ वीरौ मानुषौ देवरूपिणौ।।१३।।

अन्वयः - यदृच्छया वसुंधरां संप्राप्तौ चन्द्रसूर्यौ इव (स्थितौ) देवरूपिणौ विशालवक्षसौ वीरौ मानुषौ (देवलोकात् इह देशं कथम् आगतौ)।

अन्वयार्थः - यदृच्छया स्वेच्छया वसुंधरां पृथिवीं संप्राप्तौ प्राप्तौ चन्द्रसूर्यौ इन्दुभास्करौ इव (स्थितौ) देवरूपिणौ देवतासदृशरूपसम्पन्नौ विशालवक्षसौ महावत्ससम्पन्नौ वीरौ शूरौ मानुषौ मनुष्यौ (देवलोकात् इह देशं कथम् आगतौ)।

सरलार्थः - चन्द्रसूर्यौ यथा स्वेच्छया रामलक्ष्मणवेषेण इमां पृथिवीम् आगत्य स्थितौ। तादृशौ मनुष्यौ देवतासदृशरूपसम्पन्नौ विशालवक्षोविशिष्टौ शूरौ तौ रामलक्ष्मणौ प्रति वानरश्रेष्ठः हनुमान् पृष्टवान् यत् - युवां देवलोकं त्यक्त्वा इमं देशं केन कारणेन आगतवन्तौ इति।

तात्पर्यार्थः - प्रस्तुतेऽस्मिन् श्लोके महर्षिः वाल्मीकिः रामलक्ष्मणौ चन्द्रसूर्यतुल्यौ इति प्रदर्शयति। रामलक्ष्मणयोः दर्शनेन ज्ञायते स्म यत् स्वयं चन्द्रः सूर्यश्च यथा स्वेच्छया एव देवलोकं त्यक्तवन्तौ, किञ्च मनुष्यरूपेण इमां पृथिवीम् आगत्य स्थितवन्तौ इति। वीराणां वक्षःप्रदेशः यथा महान् भवति, तादृशः वक्षःप्रदेशः आसीत् अनयोः। देवतानां यथा रमणीयं रूपं भवति, यस्य दर्शनेन सर्वेषाम् आनन्दः जायते, तादृशं रमणीयं रूपम् अनयोः आसीत्। अत एव एतौ द्वौ न साधारणजनौ इति हनुमान् ज्ञातवान्। तस्मात् एव पृष्टवान् यत् - चन्द्रसूर्यतुल्यौ विशालवक्षोविशिष्टौ सुन्दरौ युवाम् स्वर्गलोकं त्यक्त्वा इमं दुर्गमं देशं केन कारणेन आगतवन्तौ इति।

व्याकरणविमर्शः -

- चन्द्रसूर्यौ - चन्द्रश्च सूर्यश्च चन्द्रसूर्यौ इति इतरेतरयोगद्वन्द्वसमासः।
- विशालवक्षसौ - विशालं वक्षः ययोस्तौ विशालवक्षसौ इति बहुव्रीहिसमासः।
- देवरूपिणौ - देवस्य रूपं देवरूपम् इति षष्ठीतत्पुरुषसमासः। देवरूपम् अस्यास्तीति विग्रहे देवरूपशब्दात् इन्-प्रत्यये प्रथमाद्विवचने देवरूपिणौ इति रूपम्।

सन्धिकार्यम् -

- यदृच्छयेव = यदृच्छया + इव। (गुण-सन्धिः)

प्रयोगपरिवर्तनम् - यदृच्छया वसुंधरां संप्राप्ताभ्यां चन्द्रसूर्याभ्याम् इव (स्थिताभ्यां) देवरूपिभ्यां विशालवक्षोभ्यां वीराभ्यां मानुषाभ्यां (देवलोकात् इह देशः कथम् आगतः)।

सिंहस्कन्धौ महोत्साहौ समदाविव गोवृषौ।
आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः।।१४।।

सर्वभूषणभूषार्हाः किमर्थं न विभूषिताः।
उभौ योग्यावहं मन्ये रक्षितुं पृथिवीमिमाम्।।१५।।
ससागरवनां कृत्स्नां विन्ध्यमेरुविभूषिताम्।

अन्वयः - अहं (हनुमान्) सिंहस्कन्धौ महोत्साहौ समदौ गोवृषौ इव (युवाम्) उभौ इमां ससागरवनां विन्ध्यमेरुविभूषितां कृत्स्नां पृथिवीम् रक्षितुं योग्यौ मन्ये, (अतः युवयोः) आयताः सुवृत्ताः परिघोपमाः सर्वभूषणभूषार्हाः बाहवः किमर्थं न विभूषिताः ।

अन्वयार्थः - अहं (हनुमान्) सिंहस्कन्धौ सिंहसदृशस्कन्धविशिष्टौ महोत्साहौ उत्साहसम्पन्नौ समदौ हृष्टौ गोवृषौ तरुणवृषभौ इव (युवाम्) उभौ द्वौ एव इमाम् एतां ससागरवनां समुद्रवनसहितां विन्ध्यमेरुविभूषितां विन्ध्यमेरुणा भूषितां कृत्स्नां समग्रां पृथिवीम् मेदिनीं रक्षितुं रक्षणाय योग्यौ अर्हौ मन्ये चिन्तयामि, (अतः युवयोः) आयताः विस्तृताः सुवृत्ताः पुष्टाः परिघोपमाः गदातुल्यौ सर्वभूषणभूषार्हाः सकलाभरणेन भूषयितुं योग्याः बाहवः भुजाः किमर्थं कस्मात् कारणात् न विभूषिताः अलङ्कृताः।

सरलार्थः - हनुमान् रामलक्ष्मणयोः प्रशंसां कुर्वन् पृच्छति यत् - सिंहसदृशस्कन्धविशिष्टौ तरुणवृषभवत् मदसहितौ युवाम् द्वौ एव इमां सम्पूर्णां पृथिवीं रक्षितुं योग्यौ, परन्तु युवयोः एवं विस्तृताः सुष्ठु पुष्टाः गदासदृशाः भुजाः किमर्थं अलङ्कारेण न भूषिताः इति।

तात्पर्यार्थः - प्रस्तुतेऽस्मिन् श्लोके महर्षिः वाल्मीकिः रामलक्ष्मणयोः देशरक्षणसामर्थ्यं वर्णयति। सिंहस्य स्कन्धः यथा दृढः भीषणश्च भवति, अनयोः स्कन्धः अपि तद्वत् आसीत्। एतयोः उत्साहः अपि महान् आसीत्। मदेन सहितः तरुणः वृषभः यथा बहुसामर्थ्यवान् भवति, यत् किमपि कर्तुं शक्नोति च, तद्वत् सामर्थ्यम् अनयोः आसीत्। अत एव हनुमान् तौ प्रति उक्तवान् यत् - एवं-सामर्थ्यवन्तौ युवां सागरैः अरण्यैः च सहितायाः विन्ध्यमेरुणा भूषितायाः संपूर्णायाः पृथिव्याः रक्षां कर्तुं समर्थौ इति। रामलक्ष्मणयोः भुजाः आजानुलम्बिनः गदासदृशाः आसन्, किञ्च सर्पस्य शरीरं यथा विस्तृतं भवति तथा विस्तृताः आसन् अनयोः भुजाः। तेषु भुजेषु यः कोऽपि अलङ्कारः दीयते चेत् सः अलङ्कारः तत्र शोभते। परन्तु हनुमतः विस्मयः भवति यत् एवंभूतेषु सुन्दरेषु भुजेषु कथम् एतौ अलङ्कारं न धृतवन्तौ इति।

व्याकरणविमर्शः -

- सिहंस्कन्धौ - सिंहस्य स्कन्धः सिंहस्कन्धः इति षष्ठीतत्पुरुषसमासः। सिंहस्कन्धौ इव स्कन्धौ ययोस्तौ सिंहस्कन्धौ इति उपमानपदपूर्वकबहुव्रीहिसमासः।
- महोत्साहौ - महान् उत्साहः ययोः तौ महोत्साहौ इति बहुव्रीहिसमासः।
- परिघोपमाः - परिघः उपमा येषां ते परिघोपमाः इति बहुव्रीहिसमासः।
- सर्वभूषणभूषार्हाः - सर्वाणि भूषणानि सर्वभूषणानि इति इतरेतरयोगद्वन्द्वः। सर्वभूषणानां भूषा सर्वभूषणभूषा इति षष्ठीतत्पुरुषसमासः। सर्वभूषणभूषायै अर्हः सर्वभूषणभूषार्हः इति चतुर्थीतत्पुरुषसमासः।
- रक्षितुम् - रक्ष्-धातोः तुमुन्प्रत्यये रक्षितुम् इति रूपम्।
- ससागरवनाम् - सागराश्च वनानि च सागरवनानि इति इतरेतरद्वन्द्वसमासः। सागरवनैः सहिता ससागरवना, ताम् ससागरवनाम्।
- विन्ध्यमेरुविभूषिताम् - विन्ध्यः एव मेरुः विन्ध्यमेरुः इति कर्मधारयः समासः। विन्ध्यमेरुणा विभूषिता विन्ध्यमेरुविभूषिता इति तृतीयातत्पुरुषसमासः, तां विन्ध्यमेरुविभूषिताम्।

सन्धिकार्यम् -

- समदाविव = समदौ + इव। (अच्-सन्धिः)
- आयताश्च = आयताः + च। (विसर्गसन्धिः)

- सुवृत्ताश्च = सुवृत्ताः + च। (विसर्गसन्धिः)

प्रयोगपरिवर्तनम् - (मया हनुमता) सिंहस्कन्धौ महोत्साहौ समदौ गोवृषौ इव (युवाम्) उभौ इयं ससागरवना विन्ध्यमेरुविभूषिता कृत्स्ना पृथिवी रक्षितुं योग्यावहः मन्येते, (अतः युवयोः) आयतान् सुवृत्तान् परिघोपमान् सर्वभूषणभूषार्हान् बाहून् किमर्थं न विभूषितवन्तौ ।

अलङ्कारालोचना - अस्मिन् श्लोके उपमालङ्कारः वर्तते। उपमालङ्कारस्य चत्वारः अंशाः भवन्ति, ते च उपमेयम्, उपमानं, सादृश्यवाचकपदम्, सादृश्यधर्मः चेति। उपमा द्विविधा भवति पूर्णोपमा, लुप्तोपमा चेति। यत्र एते चत्वारः अंशाः एव तिष्ठन्ति सा पूर्णोपमा भवति। यत्र च एतेषां चतुर्णां मध्ये कश्चित् एकः ततोऽधिकः वा अंशः न तिष्ठति सा लुप्तोपमा भवति। अत्र उपमेयं हि रामलक्ष्मणौ इति। उपमानं हि समदौ गोवृषौ इति। सादृश्यवाचकपदं हि इव इति। सादृश्यधर्मः हि महोत्साहत्वम् इति। चतुर्णाम् अंशानाम् असत्त्वात् अस्मिन् श्लोके लुप्तोपमा वर्तते।

इमे च धनुषी चित्रे श्लक्ष्णे चित्रानुलेपने।।१६।।
प्रकाशेते यथेन्द्रस्य वज्रे हेमविभूषिते।

अन्वयः - इमे चित्रे श्लक्ष्णे चित्रानुलेपने हेमविभूषिते धनुषी इन्द्रस्य वज्रे यथा (तथा) प्रकाशेते।

अन्वयार्थः - इमे एते चित्रे अनेकचित्रविशिष्टे श्लक्ष्णे चिक्कणे चित्रानुलेपने द्रुतसुवर्णादिनिर्मितचित्ररूपानुलेपनविशिष्टे हेमविभूषिते सुवर्णेन अलङ्कृते धनुषी कोदण्डे इन्द्रस्य जिष्णोः वज्रे वज्रद्वयं यथा (तथा) प्रकाशेते राजेते।

सरलार्थः - हनुमान् रामलक्ष्मणयोः धनुषोः प्रशंसां कुर्वन् तौ प्रति उक्तवान् यत् - इन्द्रस्य वज्रं यथा अस्ति तद्वत् युवयोः एते बहुवर्णविशिष्टे चिक्कणे सुवर्णेन अलङ्कृते धनुषी स्तः इति।

तात्पर्यार्थः - अस्मिन् श्लोके हनुमान् रामलक्ष्मणयोः धनुषोः प्रशंसां कृतवान्। तयोः धनुषोः बहवः वर्णाः आसन्। द्रुतसुवर्णेन निर्मितं यत् चित्ररूपं, तेन चित्ररूपेण अनुलेपनं कृतम् आसीत् धनुषोः मध्ये। किञ्च स्वर्णेन सज्जिते ते धनुषी चिक्कणे आस्ताम्। अर्थात् ते धनुषी दर्शनेन अपि रमणीये आस्ताम्। इन्द्रस्य वज्रं यथा न केनापि दृश्यते, अतः तत् अद्भुतं वर्तते, तद्वत् अस्मिन् लोके एवं धनुषी साधारणतः न दृश्येते, अतः एते धनुषी अपि वज्रवत् अद्भुते आस्ताम्।

व्याकरणविमर्शः -

- चित्रानुलेपने - चित्रेण अनुलेपने चित्रानुलेपने इति तृतीयातत्पुरुषसमासः।
- हेमविभूषिते - हेम्ना विभूषिते हेमविभूषिते इति तृतीयातत्पुरुषसमासः।

सन्धिकार्यम् -

- यथेन्द्रस्य = यथा + इन्द्रस्य। (गुण-सन्धिः)

प्रयोगपरिवर्तनम् - आभ्यां चित्राभ्यां श्लक्ष्णाभ्यां चित्रानुलेपनाभ्यां धनुर्भ्याम् इन्द्रस्य वज्राभ्यां यथा (तथा) प्रकाश्यते।

अलङ्कारालोचना - श्लोकेऽस्मिन् उपमालङ्कारः वर्तते। उपमालङ्कारस्य चत्वारः अंशाः भवन्ति, ते च उपमेयम्, उपमानं, सादृश्यवाचकपदम्, सादृश्यधर्मः चेति। उपमा द्विविधा भवति पूर्णोपमा, लुप्तोपमा चेति। यत्र एते चत्वारः अंशाः एव तिष्ठन्ति सा पूर्णोपमा भवति। यत्र च एतेषां चतुर्णां मध्ये कश्चित् एकः ततोऽधिकः वा अंशः न तिष्ठति सा लुप्तोपमा भवति। अत्र उपमेयं हि धनुषी इति। उपमानं हि वज्रे इति। सादृश्यवाचकपदं हि यथा इति। सादृश्यधर्मः हि शत्रुनाशकत्वम् इति। अस्मिन् श्लोके सादृश्यधर्मस्य असत्त्वात् लुप्तोपमा वर्तते।

संपूर्णाश्च शितैर्बाणैस्तूणाश्च शुभदर्शनाः।।१७।।
जीवितान्तकरैर्घोरैर्ज्वलद्भिरिव पन्नगैः।

अन्वयः - शितैः जीवितान्तकरैः पन्नगैः इव घोरैः ज्वलद्भिः बाणैः तूणाः संपूर्णाः (अत एव) शुभदर्शनाः (सन्ति)।

अन्वयार्थः - शितैः तीक्ष्णैः जीवितान्तकरैः शत्रुजीवनविध्वंसकैः पन्नगैः सर्पैः इव घोरैः भयङ्करैः ज्वलद्भिः प्रकाशमानैः बाणैः विशिखैः तूणाः तूणिराः संपूर्णाः पूर्णाः (अत एव) शुभदर्शनाः सुदर्शनाः (सन्ति)।

सरलार्थः - हनुमान् रामलक्ष्मणयोः बाणानां तूणीराणां च प्रशंसां कुर्वन् तौ प्रति उक्तवान् यत् - युवयोः बाणाः अतितीक्ष्णाः सर्पवत् शत्रुनाशकाः किञ्च भयङ्कराः, तादृशैः बाणैः युवयोः तूणीराः पूर्णाः सन्ति, अत एव ते तूणीराः अपि सुदर्शनाः सन्ति इति।

तात्पर्यार्थः - प्रस्तुतेऽस्मिन् श्लोके हनुमान् रामलक्ष्मणयोः बाणान् दृष्ट्वा विस्मितः अभवत्, अतः तेषां बाणानां प्रशंसां कृतवान् यत्, ते बाणाः अतीव तीक्ष्णाः, अर्थात् कस्यापि उपरि प्रयोगः कृतः चेत् तस्य मरणं निश्चतं भवति। शत्रुः यदि सर्पं स्पृशति तर्हि निमेषेणैव स सर्पः स्वविषेण तं शत्रुं विनाशयति। तद्वत् अनयोः बाणाः अपि निमेषेणैव शत्रुविनाशकाः आसन्। अपि च तयोः बाणाः एवं भयङ्कराः आसन् यत् तद्दर्शनमात्रम् एव शत्रोः मनसि महद् भयम् उत्पद्यते। एवंभूतैः प्रकाशमानैः बाणैः तयोः तूणीराः पूर्णाः आसन्, अतःतादृश-असाधारणबाणैः भूषिताः सन्तः तयोः तूणीराः अपि सुन्दराः दृश्यन्ते स्म।

व्याकरणविमर्शः -

- संपूर्णाः - सम्-पूर्वकात् पूर्-धातोः क्तप्रत्यये प्रथमाबहुवचने संपूर्णाः इति रूपम्।
- शुभदर्शनाः - शुभं दर्शनं येषां ते शुभदर्शनाः इति बहुव्रीहिसमासः।
- जीवितान्तकरैः - अन्तं कुर्वन्ति इति अन्तकराः। जीवितानाम् अन्तकराः जीवितान्तकराः इति षष्ठीतत्पुरुषसमासः।
- ज्वलद्भिः - ज्वल्-धातोः शतृप्रत्यये तृतीयाबहुवचने ज्वलद्भिः इति रूपम्।

सन्धिकार्यम् -

- संपूर्णाश्च = संपूर्णाः + च। (विसर्गसन्धिः)

- शितैर्बाणैः = शितैः + बाणैः। (विसर्गसन्धिः)
- बाणैस्तूणाः = बाणैः + तूणाः। (विसर्गसन्धिः)
- तूणाश्च = तूणाः + च। (विसर्गसन्धिः)
- जीवितान्तकरैर्घोरैः = जीवितान्तकरैः + घोरैः। (विसर्गसन्धिः)
- घोरैर्ज्वलद्भिः = घोरैः + ज्वलद्भिः। (विसर्गसन्धिः)
- ज्वलद्भिरिव = ज्वलद्भिः + इव। (विसर्गसन्धिः)

प्रयोगपरिवर्तनम् - शितैः जीवितान्तकरैः पन्नगैः इव घोरैः ज्वलद्भिः बाणैः तूणैः संपूर्णैः (अत एव) शुभदर्शनैः (भूयन्ते)।

अलङ्कारालोचना - अस्मिन् श्लोके उपमालङ्कारः वर्तते। उपमालङ्कारस्य चत्वारः अंशाः भवन्ति। ते यथा उपमेयम्, उपमानं, सादृश्यवाचकपदं, सादृश्यधर्मः चेति। उपमा द्विविधा भवति पूर्णोपमा, लुप्तोपमा चेति। यत्र एते चत्वारः अंशाः एव तिष्ठन्ति सा पूर्णोपमा भवति। यत्र च एतेषां चतुर्णां मध्ये कश्चित् एकः ततोऽधिकः वा अंशः न तिष्ठति सा लुप्तोपमा भवति। अत्र उपमेयं तावत् बाणाः इति। उपमानं हि पन्नगाः इति। सादृश्यवाचकपदं हि इव इति। सादृश्यधर्मः जीवितान्तकरत्वम् अर्थात् शत्रुजीवननाशकत्वम् इति। अस्मिन् श्लोके चतुर्णाम् अंशानाम् एव सत्त्वात् पूर्णोपमा वर्तते।

महाप्रमाणौ विपुलौ तप्तहाटकभूषणौ।।१८
खड्गावेतौ विराजेते निर्मुक्तभुजगाविव।

अन्वयः - महाप्रमाणौ विपुलौ तप्तहाटकभूषणौ एतौ खड्गौ निर्मुक्तभुजगौ इव विराजेते।

अन्वयार्थः - महाप्रमाणौ अतिप्रमाणविशिष्टौ विपुलौ पुष्टौ तप्तहाटकभूषणौ द्रुतसुवर्णलिखितौ एतौ इमौ खड्गौ तूण्यौ निर्मुक्तभुजगौ त्यक्तकञ्चुकसर्पौ इव विराजेते शोभेते।

सरलार्थः - हनुमान् रामलक्ष्मणयोः खड्गयोः प्रशंसां कुर्वन् तौ प्रति उक्तवान् यत् - युवयोः खड्गौ अतिदीर्घौ, किञ्च तत्र द्रुतकनकेन अङ्कितं वर्तते स्म। अपि च कञ्चुकं त्यक्तवन्तौ सर्पौ इव तौ खड्गौ आस्ताम् इति।

तात्पर्यार्थः - प्रस्तुतेऽस्मिन् श्लोके महर्षिः वाल्मीकिः हनुमन्मुखेन रामलक्ष्मणयोः खड्गयोः वर्णनां करोति। तयोः खड्गौ अतिदीर्घौ आस्ताम्। अपि च तौ एवं पुष्टौ आस्ताम्, यत् ताभ्यां शत्रूणां विनाशनं कर्तुं शक्यम् आसीत्। द्रुतसुवर्णेन तत्र खड्गयोः मध्ये अङ्कितम् आसीत्। अतः तौ खड्गौ दर्शनेन अपि अतीव रमणीयौ आस्ताम्। सर्पः यदा कञ्चुकं त्यजति ततः परं स सर्पः पूर्वात् अपि अधिकः चिक्कणः भवति, तद्वत् चिक्कणौ आस्ताम् एतयोः खड्गौ।

व्याकरणविमर्शः -

- महाप्रमाणौ - महत् प्रमाणं ययोः तौ महाप्रमाणौ इति बहुव्रीहिसमासः।
- तप्तहाटकभूषणौ - तप्तं च तत् हाटकं तप्तहाटकम् इति कर्मधारयसमासः। तप्तहाटकं भूषणं ययोः तौ तप्तहाटकभूषणौ इति बहुव्रीहिसमासः।

- निर्मुक्तभुजगौ - निर्मुक्तौ च तौ भुजगौ निर्मुक्तभुजगौ इति कर्मधारयसमासः।

सन्धिकार्यम् -

- खड्गावेतौ = खड्गौ + एतौ। (अच्-सन्धिः)
- निर्मुक्तभुजगाविव = निर्मुक्तभुजगौ + इव।

प्रयोगपरिवर्तनम् - महाप्रमाणाभ्यां विपुलाभ्यां तप्तहाटकभूषणाभ्याम् एताभ्यां खड्गाभ्यां निर्मुक्तभुजगाभ्याम् इव विराज्यते।

अलङ्कारालोचना - अयं श्लोकः उपमालङ्कारसमन्वितः वर्तते। उपमालङ्कारस्य चत्वारः अंशाः भवन्ति, ते च उपमेयम्, उपमानं, सादृश्यवाचकपदम्, सादृश्यधर्मः चेति। उपमा द्विविधा भवति पूर्णोपमा, लुप्तोपमा चेति। यत्र एते चत्वारः अंशाः एव तिष्ठन्ति सा पूर्णोपमा भवति। यत्र च एतेषां चतुर्णां मध्ये कश्चित् एकः ततोऽधिकः वा अंशः न तिष्ठति सा लुप्तोपमा भवति। अत्र उपमेयवाचकपदं हि खड्गौ इति। उपमानं हि निर्मुक्तभुजगौ इति। सादृश्यवाचकपदं हि इव इति। सादृश्यधर्मः हि चिक्कणत्वं इति। अस्मिन् श्लोके चतुर्णाम् अंशानां मध्ये सादृश्यधर्मस्य असत्त्वात् लुप्तोपमा वर्तते।

एवं मां परिभाषन्तं कस्माद्वै नाभिभाषतः।।१९

अन्वयः - एवं परिभाषन्तं मां कस्मात् वै (युवां) न अभिभाषतः।

अन्वयार्थः - एवम् अनेन प्रकारेण परिभाषन्तं कथयन्तं मां हनुमन्तं कस्मात् कस्मात् हेतोः वै (भवन्तौ) न अभिभाषतः भाषेते।

सरलार्थः - एवं रामलक्ष्मणयोः प्रशंसायाः परं हनुमान् किञ्चित् विस्मितः भूत्वा तौ पृष्टवान् यत् - अहम् एतावत्कालपर्यन्तं बहु किमपि उक्तवान्, परन्तु युवां कथं मां प्रति किमपि न वदथः इति।

तात्पर्यार्थः - हनुमान् एतावत्कालपर्यन्तं रामलक्ष्मणयोः वीरत्वस्य, सौन्दर्यस्य, तयोः भुजानां, धनुषोः, बाणानां खड्गयोश्च बहुप्रशंसां कृतवान्, परन्तु तौ रामलक्ष्मणौ एतत् सर्वं श्रुत्वा अपि मौनेन एव स्थितवन्तौ, न किमपि उक्तवन्तौ। अत एव हनुमान् किञ्चित् विस्मितः भूत्वा तौ प्रति उक्तवन्तौ यत् - अहम् एतावत्कालपर्यन्तं बहु किमपि उक्तवन्तौ, परन्तु युवां कथं मा प्रति किमपि न वदथः इति।

व्याकरणविमर्शः -

- परिभाषन्तम् - परिपूर्वकात् भाष्-धातोः शतृप्रत्यये द्वितीयैकवचने परिभाषन्तम् इति रूपम्। अत्र भाष्-धातोः परस्मैपदप्रयोगः आर्षः।

सन्धिकार्यम् -

- कस्माद्वै = कस्मात् + वै। (जश्त्व-सन्धिः)
- नाभिभाषतः= न + अभिभाषतः। (सवर्णदीर्घसन्धिः)

प्रयोगपरिवर्तनम् - एवं परिभाषन् अहं कस्मात् वै (युवाभ्यां) न अभिभाष्ये।

सुग्रीवो नाम धर्मात्मा कश्चिद् वानरपुङ्गवः
वीरो विनिकृतो भ्रात्रा जगद् भ्रमति दुःखितः।।२०।।

अन्वयः - सुग्रीवः नाम कश्चित् वानरपुङ्गवः वीरः धर्मात्मा भ्रात्रा विनिकृतः दुःखितः जगत् भ्रमति।

अन्वयार्थः - सुग्रीवः नाम सुग्रीवनामधेयः कश्चित् कश्चन वानरपुङ्गवः कपिश्रेष्ठः वीरः शूरः धर्मात्मा धार्मिकः भ्रात्रा सहोदरेण विनिकृतः वञ्चितः दुःखितः व्यथितः जगत् विश्वं भ्रमति सञ्चरति।

सरलार्थः - हनुमान् सुग्रीवविषये रामलक्ष्मणौ प्रति उक्तवान् यत् - सुग्रीवो हि महाधार्मिकः कश्चन वानरेषु श्रेष्ठः, महावीरः स्वभ्रात्रा वञ्चितो भूत्वा दुःखितः सन् विश्वं भ्रमति इति।

तात्पर्यार्थः - सुग्रीवेण प्रेषितः हनुमान् रामलक्ष्मणयोः समीपं गतवान्, तत्र च तयोः वीरत्वसौन्दर्यादिकं दृष्ट्वा ज्ञातवान् यत्, एतौ न साधारणजनौ इति। अतः एव तौ वालिना न प्रेषितौ इति निश्चयः अभवत् तस्य। तस्मात् स्वस्य राज्ञः सुग्रीवस्य स्तुतिपूर्वकं तस्य विषये उक्तवान् यत् - सुग्रीवः हि वानरेषु श्रेष्ठः कश्चन महावीरः वानरः वर्तते। स हि एकः महान् धार्मिकः। परन्तु तस्य भ्राता वाली केनचित् कारणेन तं वञ्चितवान्। स वाली अधुना तं मारयितुं प्रयत्नं करोति। अतः सुग्रीवः इदानीं दुःखितः सन् भ्रातुः भयात् समग्रं विश्वं भ्रमति इति।

व्याकरणविमर्शः -

- वानरपुङ्गवः - वानरेषु पुङ्गवः वानरपुङ्गवः इति सप्तमीतत्पुरुषसमासः।
- विनिकृतः - विपूर्वकात् निपूर्वकात् च कृधातोः क्तप्रत्यये प्रथमैकवचने विनिकृतः इति रूपम्।

सन्धिकार्यम् -

- सुग्रीवो नाम = सुग्रीवः + नाम। (विसर्गसन्धिः)
- कश्चिद्वानरपुङ्गवः = कश्चित् + वानरपुङ्गवः। (जश्त्वसन्धिः)
- जगद्भ्रमति = जगत् + भ्रमति। (जश्त्वसन्धिः)

प्रयोगपरिवर्तनम् - सुग्रीवेण नाम्ना केनचित् वानरपुङ्गवेन वीरेण धर्मात्मना भ्रात्रा विनिकृतेन दुःखितेन जगत् भ्रम्यते।

प्राप्तोऽहं प्रेषितस्तेन सुग्रीवेण महात्मना।
राज्ञा वानरमुख्यानां हनुमान्नाम वानरः।।२१।।

अन्वयः - तेन वानरमुख्यानां राज्ञा महात्मना सुग्रीवेण प्रेषितः अहं हनुमान् नाम वानरः (त्वां) प्राप्तः (अस्मि)।

अन्वयार्थः - अहं तेन वानरमुख्यानां कपीनां राज्ञा नृपेण महात्मना महाबुद्धिना सुग्रीवेण सुग्रीवनामकेन प्रेषितः प्रेरितः हनुमान् नाम हनुमान्नामधेयः वानरः मर्कटः (त्वां) प्राप्तः संप्राप्तः (अस्मि)।

सरलार्थः - रामलक्ष्मणयोः स्वरूपं ज्ञात्वा हनुमान् स्वविषये तौ प्रति उक्तवान् यत् - मम नाम हनुमान्, वानरराजः महात्मा सुग्रीवः माम् अत्र प्रेषितवान्, अतः अहं युवयोः समीपम् आगतः इति।

तात्पर्यार्थः - पूर्वश्लोके हनुमान् स्वस्य राज्ञः सुग्रीवस्य विषये उक्तवान्। अतः प्रस्तुतेऽस्मिन् श्लोके हनुमान् रामलक्ष्मणौ प्रति स्वस्य परिचयं वक्तुम् आरब्धवान्। हनुमान् सविनयं नम्रो भूत्वा तौ उक्तवान् यत् - मम नाम हनुमान्, अहम् एकः वानरः अस्मि। वानरराजस्य महात्मनः सुग्रीवस्य आदेशानुसारम् अहं युवयोः समीपम् आगतवान् इति।

व्याकरणविमर्शः -

- महात्मना - महान् आत्मा यस्य स महात्मा इति बहुव्रीहिसमासः।
- वानरमुख्यानाम् - वानरेषु मुख्याः वानरमुख्याः इति षष्ठीतत्पुरुषसमास, तेषां वानरमुख्यानाम्।

सन्धिकार्यम् -

- प्राप्तोऽहम् = प्राप्तः + अहम्। (विसर्गसन्धिः)
- प्रेषितस्तेन = प्रेषितः + तेन। (विसर्गसन्धिः)
- **प्रयोगपरिवर्तनम्** - मया तेन वानरमुख्यानां राज्ञा महात्मना सुग्रीवेण प्रेषितेन हनुमता नाम वानरेण (त्वां) प्राप्तेन (भूयते)।

युवाभ्यां स हि धर्मात्मा सुग्रीवः सख्यमिच्छति।

अन्वयः - स हि धर्मात्मा सुग्रीवः युवाभ्यां (सह) सख्यम् इच्छति।

अन्वयार्थः - स हि धर्मात्मा धर्मपरायणः सुग्रीवः सुग्रीवनामकः राजा युवाभ्यां भवद्भ्यां (सह) सख्यं मैत्र्यम् इच्छति काङ्क्षति।

सरलार्थः - वानरराजः सुग्रीवः हनुमन्तं कथं रामलक्ष्मणयोः समीपं प्रेषितवान् इति प्रश्ने हनुमान् उक्तवान् यत् - सुग्रीवः युवयोः मित्रं भवितुम् इच्छति इति।

तात्पर्यार्थः - हनुमतः परिचयज्ञानात् अनन्तरं, सुग्रीवः हनुमन्तम् अत्र प्रेषितवान् इति ज्ञातवान् श्रीरामः। अतः एव सुग्रीवेण हनुमतः अत्र प्रेषणस्य कारणं ज्ञातुम् इष्टवान् सः। तस्मात् हनुमान् तत् वक्तुम् आरभते स्म। हनुमान् उक्तवान् यत् - वानरराजः सुग्रीवः रामलक्ष्मणाभ्यां सह मैत्रीं स्थापयितुम् इच्छति। अतः स युवयोः परिचयं ज्ञातुम् अत्र मां प्रेषितवान् इति।

व्याकरणविमर्शः -

- सख्यम् - सखिशब्दात् ष्यञ्प्रत्यये द्वितीयैकवचने सख्यम् इति रूपम्।

सन्धिकार्यम् -

- स हि = सः + हि। (विसर्गसन्धिः)

प्रयोगपरिवर्तनम् - तेन हि धर्मात्मना सुग्रीवेण युवाभ्यां (सह) सख्यम् इष्यते।

तस्य मां सचिवं वित्तं वानरं पवनात्मजम्।।२२।।
भिक्षुरूपप्रतिच्छन्नं सुग्रीवप्रियकारणात्।
ऋष्यमूकादिह प्राप्तं कामगं कामचारिणम्।।२३।।

अन्वयः - भिक्षुरूपप्रतिच्छन्नं सुग्रीवप्रियकारणात् ऋष्यमूकात् इह प्राप्तं कामगं कामचारिणं तस्य सचिवं पवनात्मजं वानरं मां वित्तम्।

अन्वयार्थः - भिक्षुरूपप्रतिच्छन्नं भिक्षुकवेषेण आच्छन्नं सुग्रीवप्रियकारणात् सुग्रीवस्य प्रियं कर्तुम् ऋष्यमूकात् ऋष्यमूकनामकात् पर्वतात् इह अत्र प्राप्तं संप्राप्तं कामगं यथेच्छं गमनकर्तारं कामचारिणं कामरूपिणं तस्य सुग्रीवस्य सचिवं चरं पवनात्मजं मारुतपुत्रं वानरं कपिं मां हनुमन्तं वित्तं जानीतम्।

सरलार्थः - हनुमान् रामलक्ष्मणौ प्रति स्वविषये उक्तवान् यत् - अहं वायोः पुत्रः हनुमान् वानरराजस्य सुग्रीवस्य सचिवःअस्मि। युवयोः परिचयज्ञानं सम्प्रति तस्य इष्टं कर्म, अतः तद् कर्तुम् अहं भिक्षुकवेषेण ऋष्यमूकपर्वतात् अत्र आगतवान्। अहम् इच्छानुसारं सर्वत्र गन्तुं शक्नोमि। किञ्च यत् किमपि रूपं धर्तुं शक्नोमि इति।

तात्पर्यार्थः - वानरराजः सुग्रीवः रामलक्ष्मणाभ्यां सह मैत्रीं स्थापयितुम् इच्छति, अतः स हनुमन्तम् अत्र प्रेषितवान् इति हनुमन्मुखात् ज्ञातवान् श्रीरामः। परन्तु तेन सुग्रीवेण सह हनुमतः कः सम्बन्धः अस्ति, इति प्रश्ने हनुमान् तौ प्रति उक्तवान् यत् - अहं वायोः पुत्रः हनुमान् तस्य वानरराजस्य सुग्रीवस्य सचिवः अस्मि। युवयोः परिचयविषयकं ज्ञानं वानरराजस्य सुग्रीवस्य सम्प्रति इष्टं कार्यं वर्तते, अतः अहं युवयोः परिचयं ज्ञातुं भिक्षुकवेषं धृत्वा ऋष्यमूकपर्वतात् युवयोः समीपम् आगतवान्। अहम् इच्छानुसारं यत्र कुत्रापि गन्तुं शक्नोमि, किञ्च इच्छानुसारं यत् किमपि रूपं धर्तुं शक्नोमि इति। वस्तुतः प्रस्तुतेऽस्मिन् श्लोके महर्षिः वाल्मीकिः हनुमतः साधारणेभ्यः अधिकं सामर्थ्यं वर्णयति।

व्याकरणविमर्शः -

- वित्तम् - विद्-धातोः लोट्लकारे मध्यमपुरुषद्विवचने वित्तम् इति रूपम्।
- पवनात्मजम् - पवनस्य आत्मजः पवनात्मजः इति षष्ठीतत्पुरुषसमासः , तं पवनात्मजम्।
- भिक्षुरूपप्रतिच्छन्नम् - भिक्षुरूपेण प्रतिच्छन्नः भिक्षुरूपप्रतिच्छन्नः इति तृतीयातत्पुरुषसमासः, तं भिक्षुरूपप्रतिच्छन्नम्।
- सुग्रीवप्रियकारणात् - सुग्रीवस्य प्रियं सुग्रीवप्रियम् इति षष्ठीतत्पुरुषसमासः। सुग्रीवप्रियमेव कारणम् सुग्रीवप्रियकारणम् इति कर्मधारयसमासः।
- कामचारिणम् - कामं चरति इति कामचारी, तं कामचारिणम्।

सन्धिकार्यम् -

- ऋष्यमूकादिह = ऋष्यमूकात् + इह। (जश्त्व-सन्धिः)

प्रयोगपरिवर्तनम् - भिक्षुरूपप्रतिच्छन्नः सुग्रीवप्रियकारणात् ऋष्यमूकात् इह प्राप्तः कामगः कामचारी तस्य सचिवः पवनात्मजः वानरः अहं विद्यै।

पाठगतप्रश्नाः

१) कया पर्वतेन्द्रः अवभासितः।

२) रामलक्ष्मणयोः नेत्रे कीदृशे आस्ताम्।

३) रामलक्ष्मणौ कस्मात् लोकात् इह आगतवन्तौ।

४) चन्द्रसूर्यौ कुत्र संप्राप्तौ।

५) रामलक्ष्मणौ कौ इव महोत्साहौ आस्ताम्।

६) रामलक्ष्मणयोः भुजाः कीदृशाः आसन्।

७) रामलक्ष्मणौ कां रक्षितुं योग्यौ आस्ताम्।

८) तयोः धनुषी कीदृशे आस्ताम्।

९) तयोः धनुषी के इव प्रकाशेते।

१०) तयोः तूणाः कैः संपूर्णाः।

११) तयोः खड्गौ कौ इव आस्ताम्।

१२) सुग्रीवः केन विनिकृतः।

१३) सुग्रीवः किम् इच्छति।

१४) हनुमान् कीदृशः आसीत्।

१५) पद्मपत्रेक्षणौ... इत्यत्र कः अलङ्कारः विद्यते।

क)दृष्टान्तालङ्कारः　　ख)उपमालङ्कारः

ग)रूपकालङ्कारः　　घ)उत्प्रेक्षालङ्कारः

१६) "राज्यार्हावमरप्रख्यौ कथं देशमिहागतौ"-इति कस्य उक्तिः।

क)सुग्रीवस्य　　ख)हनुमतः

ग)रामस्य　　घ)लक्ष्मणस्य

१७)विन्ध्यमेरुविभूषिता इति कस्य विशेषणम्।

क)पम्पानन्द्याः　　ख)सीतायाः

ग)पृथिव्याः　　घ)लङ्कायाः

१८) बाणाः कैः उपमिताः।

क)पन्नगैः　　ख)वज्रैः

ग)निर्मुक्तभुजगैः　　घ)गजशुण्डैः

१९) हनुमान् कस्य सचिवः।

क)रामस्य ख)वायोः

ग)वालिनः घ)सुग्रीवस्य

२०) क-स्तम्भेन सह ख-स्तम्भं मेलयतु - -

क-स्तम्भः	**ख-स्तम्भः**
१.मन्ये	क. सञ्चरति
२. पद्मपत्रे	ख. बाहवः
३.चन्द्रसूर्यौ	ग. गोवृषौ
४. प्रकाशेते	घ. ईक्षणे
५. समदौ	ङ. सुग्रीवः
६. विराजेते	च. राजेते
७. सर्वभूषणभूषार्हाः	छ. जानीतम्
८. भ्रमति	ज. चिन्तयामि
९. दुःखितः	झ. शोभेते
१०. वित्तम्	ञ. रामलक्ष्मणौ

पाठसारः

सुग्रीवादेशानुसारं हनुमान् स्ववानररूपम् आच्छाद्य भिक्षुकवेषेण पम्पासरोवरतीरे स्थितयोः रामलक्ष्मणयोः समीपम् उपस्थितः। तत्र गत्वा स स्वस्य मनोहरवचसा तयोः प्रशंसां कर्तुम् आरब्धवान्। सुन्दरयोः तयोः श्रिया ऋष्यमूकनामकः पर्वतेन्द्रः प्रकाशितो जातः। राजसिंहासनाय अर्हौ तौ कथं तपस्विवेषेण इमं दुर्गमं देशम् आगतवन्तौ इति आसीत् हनुमतः पृच्छा। जटाधारिणोः तयोः लोचने कमलपत्रे इव आस्ताम्। तयोः दर्शनेन ज्ञायते यत् यथा चन्द्रसूर्यौ एव स्वेच्छया मनुष्यरूपेण इमां वसुन्धराम् आगतौ इति। पशुराजसिंहात् अपि अधिकबलवन्तौ तरुणवृषभौ इव महोत्साहौ तौ सागरवनसहितां विन्ध्यमेरुणा विभूषिताम् इमां सम्पूर्णां पृथिवीं रक्षितुं योग्यौ इति हनुमतः निश्चयः आसीत्। परन्तु सः विस्मयः अभवत् यत् रामलक्ष्मणयोः भुजाः अतीव विस्तृताः गदासदृशदृढाः आसन्। येन केनचित् अलङ्कारेण अलङ्कृताः क्रियन्ते चेत् ते भुजाः शोभन्ते स्म। परन्तु तथापि एवं सुन्दरेषु भुजेषु तौ न कमपि अलङ्कारं धृतवन्तौ इति।

इन्द्रस्य वज्रेण सदृशे तयोः धनुषी द्रुतसुवर्णेन अङ्किते आस्ताम्। सर्पैः इव शत्रुप्राणविनाशकैः भयङ्करैः प्रकाशमानैः बाणैः तयोः तूणाः सम्पूर्णाः आसन्, अत एव ते तूणाः अपि तादृशबाणैः विभूषिताः सन्तः सुदर्शनाः सञ्जाताः। एवंप्रकारेण हनुमान् रामलक्ष्मणयोः बहुप्रशंसां कृतवान्। परन्तु तौ द्वौ किमपि अनुक्त्वा तूष्णीम् एव आस्ताम्। तस्मात् हनुमान् तत्कारणं पृष्ट्वा राज्ञः सुग्रीवस्य विषये वक्तुम्

आरब्धवान्। ततः स सुग्रीवसचिवत्वेन स्वपरिचयं प्रदाय सुग्रीवः एव ताभ्यां सह सख्यम् इच्छन् तम् अत्र प्रेषितवान् इति अवदत्। एतत् सर्वम् उक्त्वा स पुनः तौ किमपि न अभाषत।

किमधिगतम्

- द्युतिमतः द्युत्या तत्संसर्गस्थं वस्तु अपि द्युतिमत्त्वं प्राप्नोति।
- प्रशंसार्हस्य यथावत् प्रशंसा करणीया।
- राज्यसिंहासनायोग्येन राज्यभारः अवश्यं वोढव्यः।
- स्वपरिचयात् पूर्वम् आदौ स्वराज्ञः परिचयः प्रदेयः।
- स्वराज्ञः प्रशंसा सर्वत्र कर्तव्या।

पाठान्तप्रश्नाः

१. रामलक्ष्णयोः भुजानां विषये हनुमतः उक्तिं सप्रसङ्गम् आलोचयत।

२. रामलक्ष्णयोः शस्त्राणि यथाग्रन्थं वर्णयत।

३. रामलक्ष्णयोः बाणाः कीदृशाः आसन् इति यथाग्रन्थम् आलोचयत।

४. संपूर्णाश्च शितैर्बाणैः........इत्यत्र यः अलङ्कारः वर्तते तद्विषये संक्षेपेण लिखत।

५. हनुमान् सुग्रीवविषये स्वविषये च तयोः समीपे किम् उक्तवान् इति सप्रसङ्गं लिखत।

६. हनुमतः किं किं सामर्थ्यम् आसीत्।

उत्तरतालिका

१) रामलक्ष्मणयोः प्रभया

२) पद्मपत्रे इव

३) देवलोकात्

४) वसुन्धराम्

५) समदौ गोवृषौ इव

६) आयताः सुवृत्ताः सर्वभूषणभूषार्हाः च

७) ससागरवनां विन्ध्यमेरुविभूषितां पृथिवीम्

८) चित्रे श्लक्ष्णे चित्रानुलेपने च

९) इन्द्रस्य वज्रे इव

१०) पन्नगैः इव जीवितान्तकरैः घोरैः शितैः बाणैः

११) निर्मुक्तभुजगौ इव

१२) भ्रात्रा

१३) रामलक्ष्मणाभ्यां सह सख्यम्

१४)कामगः कामचारी च

१५) ख)

१६) ख)

१७)ग)

१८) क)

१९) घ)

२०) १-ज, २-घ, ३-ञ, ४-च, ५-ग, ६-झ, ७. ख, ८. क, ९. ङ, १०. छ।

॥इति त्रयोदशः पाठः॥